॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥
७. सप्तमः सर्गः
अथ हैमवते तटांतरे बदरीषंडविशेषमंडितम् ।
परमाश्रममाश्रयं श्रियः सकलज्ञः स ददर्श विश्रुतम् ॥ ७.१ ॥

हिमवर्षरविप्रभासहाः पृथुसत्रप्रथिता द्विजाश्रयाः ।
अपि विष्णुपदस्पृशोऽलसनुभये यत्र विचित्रशाखिनः ॥ ७.२ ॥

श्रवणामृतगीर्गणैर्द्विजैः शुकमुख्यैः शुभपक्षिभिर्वृतम् ।
कमलेष्टतमस्थिरांतरैःअपि हंसैः परमैरमेचकैः ॥ ७.३ ॥

सुमनोनिकरेण पूरितं स्वमनोऽभीष्टदमल्पदुर्गमम् ।
अपरस्परमत्सरप्रजं ननु वैकुंठमिवाच्युतालयम् ॥ ७.४ ॥

तमिमं प्रविशंतमाश्रमं द्व्यधिकत्रिंशदुदारलक्षणम् ।
गुणसारविदः कुतूहलाद् अवलोक्यर्षय इत्यचिंतयन् ॥ ७.५ ॥

कनकातुलतालसन्निभः कमलाक्षो विमलेंदुसन्मुखः ।
गजराजगतिर्महाभुजः प्रतियान् कोऽयमपूर्वपूरुषः ॥ ७.६ ॥

अतिशांतवपुर्निशाकरः स्वयमेकांतखरो दिवाकरः ।
इति नास्य गुणार्णवाकृतेःउपमानं भुवनेषु लभ्यते ॥ ७.७ ॥

परमाश्रमिणां गतश्रमो ननु चिह्नानि बिभर्ति धीरधीः ।
अपि मानुषभावविग्रहो विपुलं विस्मयमातनोति नः ॥ ७.८ ॥

चतुरश्चतुराननः स्वयं पवनो वा व्रतिरूप आव्रजन् ।
श्रुतिनाथदिदृक्षयाऽन्यथा न खलु स्यान्निखिलाग्र्यलक्ष्मवान् ॥ ७.९ ॥

अवलोकितलक्षणः स तैः इति संचिंत्य कुतूहलाकुलैः ।
अविळंबगतिर्न्यशामयत् तरुमारात् सुरपादपोत्तमम् ॥ ७.१० ॥

मसृणत्वचमुन्नतं ततं बहुशाखाफणसूनरत्नकम् ।
भगवंतमनंतमंतिके स्थितमीशस्य निषेवणाय वा ॥ ७.११ ॥

अतिचित्रविचित्रपत्रिणं बहुवर्णं हरिगोनिवारकम् ।
मुनिनंदनमिंदिरापतेः अधिकेष्टं पततामिवाधिपम् ॥ ७.१२ ॥

अमृतात्ममहाफलप्रदं दुरवापं हरिभक्तिवर्जितैः ।
श्रितसाधुपुराणभारतं निगमं मूर्तमिवोरुशाखिनम् ॥ ७.१३ ॥

अथ तस्य स वेदिकांतरे सुविशाले विमले मनोहरे ।
अवलोकितवाननंतधीःदिवि देवानिव तापसोत्तमान् ॥ ७.१४ ॥

अपि सप्ततया विराजितान् गतसंख्यान् गुणिनो गुणोज्झितान् ।
अपि मन्युमदादिवर्जितान् गतभोगान् पवनाशनान् सदा ॥ ७.१५ ॥

मुनिमंडलमध्यवर्तिनं त्रिजगन्मंडलमंडनायितम् ।
इह सत्यवतीसुतं हरिं परिपूर्णप्रमतिः समैक्षत ॥ ७.१६ ॥

निजहृत्कमलेऽतिनिर्मले सततं साधु निशामयन्नपि ।
अवलोक्य पुनःपुनर्नवं तमसौ विस्मित इत्यचिंतयत् ॥ ७.१७ ॥

अगणय्यगुणार्णवोऽमलः स हि नारायण ऐष केवलम् ।
विधिनाऽनुसृतं पराशरात् सुषुवे सत्यवती किलात्र यम् ॥ ७.१८ ॥

धवळेऽस्य मनःपयोनिधौ सदनुक्रोशगिरींद्रलोळिते ।
प्रकटीभवति स्म सुंदरी दयिता दैत्यरिपोस्त्रयीमयी ॥ ७.१९ ॥

इत ऐव पुराणगौरगौ समहाभारतपारिजातके ।

सति जातवति व्यजायत प्रवरं सूत्रगणामृतं स्वयम् ॥ ७.२० ॥

निरवग्रहमुर्वनुग्रहं विदधत् पांडुसुतादिसज्जने ।
अवनाववनाय संविदां सुचिरायैष चचार चारुगीः ॥ ७.२१ ॥

अधुना कलिकालवृत्तये सवितेव क्षणदानुवृत्तये ।
जनदृग्विषयत्वमत्यजद्भगवानाश्रममावसन्निमम् ॥ ७.२२ ॥

तदिदं वपुरस्य दृश्यते दलितेंदीवरसुंदरद्युति ।
परमाजिनयोगपीठगं मम चेतोनयनाभिनंदनम् ॥ ७.२३ ॥

अगणय्यगुणैः सुपूरितं परिपूर्णागणितात्मसद्गुणैः ।
इदमस्तसमस्तदूषणं सच्चिदानंदमयं हि केवलम् ॥ ७.२४ ॥

कमलाकमलासनानिलैः विहगाहींद्रशिवेंद्रपूर्वकैः ।
पदपद्मरजोऽस्य धारितं शिरसा हंत वहाम्यहं मुहुः ॥ ७.२५ ॥

प्रणमामि पदद्वयं विभोः ध्वजवज्रांकुशपद्मचिह्नवत् ।
निजमानसरागपीडनादरुणीभूतमिवारुणं स्वयम् ॥ ७.२६ ॥

ननु केवलमेव वैष्णवं श्रितवंतः पदमात्मरोचिषा ।
तमसोऽप्युभयस्य नाशका विजयंते नखरा नवं रविम् ॥ ७.२७ ॥

सुकुमारतळांगुलीमतोः पदयोरस्य निगूढगुल्फयोः ।
उपमानमहो न लभ्यते कविवर्यैरितरेतरं विना ॥ ७.२८ ॥

उचितां गुरुतां दधत् क्रमात् शुचि तेजस्वि सुवृत्तमुत्तमम् ।
भजतोऽत्र च भाजयत्यदो विभुजंघायुगळं सरूपताम् ॥ ७.२९ ॥

अचलासनयोगपट्टिका वरकक्ष्या सकृदाप्तमिष्टदम् ।
परितोऽपि हरिं स्फुरंत्यहो अनिशं धन्यतमेति मे मतिः ॥ ७.३० ॥

रुचिरेण वरैणचर्मणा रुचिराजद्युतिचारुरोचिषा ।
परमोरुनितंबसंगिना परमाश्चर्यतया विराज्यते ॥ ७.३१ ॥

तनुनिम्नसुनाभिशोभिते वलिभे वारिजनाभ आदधे ।
प्रतनावतिसुंदरे मृदौ उदरेऽस्मिन् जगदंडमंडलम् ॥ ७.३२ ॥

हृदये कृतसज्जनोदये सुविशाले विमले मनोहरे ।
उभयं वहति त्रयीमयं भगवान् ब्रह्मसुसूत्रमुत्तमम् ॥ ७.३३ ॥

असमेऽनधिके सुसाधिते निजताते रविराशिदीधिति ।
प्रददौ त्रिजगज्जयध्वजं विधिरेतद्गळसंगि भूषणम् ॥ ७.३४ ॥

अरिवारिजलक्षणोल्लसत्सुकुमारारुण पाणिपद्मयोः ।
पृथुपीवरवृत्तहस्तयोःउपमां नैव लभामहेऽनयोः ॥ ७.३५ ॥

भजतां वरतर्कमुद्रया द्यति हस्ताग्रमबोधमीशितुः ।
अधिजानु समर्पितं परं कृतभूयोभयभंगमंगलम् ॥ ७.३६ ॥

सततं गळता स्वतः श्रुतित्रितयेनेव निकाममंकितः ।
सुविडंबितकंबुरीक्ष्यते वररेखात्रयवान् गुरोर्गळः ॥ ७.३७ ॥

सकलास्तकलंककाळिमस्फुरदिंदुप्रकरोरुविभ्रमम्।
अधरीकुरुते स्वशोभया वदनं देवशिखामणेरिदम् ॥ ७.३८ ॥

अरुणाश्मदलांतरोल्लसन्नवमुक्तावलिमस्य लज्जयेत् ।
हसतः सितदंतसंततिः परमश्रीररुणोष्ठरोचिषः ॥ ७.३९ ॥

द्विजवृंदकृतं कुतूहलाद् अनुयोगांधुसहस्रमुत्तमम् ।
इयमेकपदे सरस्वती श्रुतिभर्तुः परिपूरयत्यहो ॥ ७.४० ॥

जलजायतलोचनस्य मां अवलोकोऽयमुपेत्य लाळयन् ।
कुरुते परिरभ्य पूरितं भुवनानंदकरस्मितान्वितः ॥ ७.४१ ॥

उपकर्णममुष्य भासिता तुळसी मंत्रयतीव लाळिता ।
मम नाथ पदं न मत्सरात् जलजाद्यानि हरेयुरित्यलम् ॥ ७.४२ ॥

विभवाभिभवोद्भवादिकं भुवनानां भुवनप्रभोर्भ्रुवोः ।
अनयोरपि दभ्रविभ्रमात् सभवांभोजभवात्मनां भवेत् ॥ ७.४३ ॥

त्रिजगत्तिलकाळिकांतरे तिलकोऽयं परभागमाप्तवान् ।
हरिनीलगिरींद्रमस्तकस्फुटशोणोपलपंक्तिसन्निभः ॥ ७.४४ ॥

नवमंबुधरं विडंबयद्धरविद्युद्वलयं जगद्गुरोः ।
अवलोक्य कृतार्थतामगां सजटामंडलमंडनं वपुः ॥ ७.४५ ॥

न रमाऽपि पदांगुलीलसन्नखधूराजदनंतसद्गुणान् ।
गणयेद् गणयंत्यनारतं परमान् कोऽस्य परो गुणान् वदेत् ॥ ७.४६ ॥

न कुतूहलिता कुतूहलं तनुमेनामवलोक्य सद्गुरोः ।
सनवावरणांडदर्शिनो गृहबुद्ध्या मम निष्कुतूहलम् ॥ ७.४७ ॥

इति चिंतयता महाधिया पदवीं बाह्यगतामतीयुषा ।
स मनोनयनैः पुरागतः तत आपे वपुषाऽपि वेदराट् ॥ ७.४८ ॥

गुरुभक्तिभरानताकृतिः विरचय्यांजलिबंधमंजसा ।
क्षणमामुकुळीकृतेक्षणः स गुरुं केवलमभ्यवंदत ॥ ७.४९ ॥

विनयाभरणेन भूषितः स्फुटमष्टांगविशिष्टचेष्टितः ।
भगवत्तमपादपंकजे भगवान् स प्रणनाम भाग्यवान् ॥ ७.५० ॥

स निरीक्ष्य पराशरात्मजः प्रणतं प्रेष्ठमशेषसद्गुणैः ।

करयोर्युगळेन वल्गुना तमुदस्थापयदाशुपातिना ॥ ७.५१ ॥

अमितप्रमतिं श्रुतीश्वरः परिरेभे परिगृह्य तं द्रुतम् ।
प्रणयामृतपूर्णमानसः स्मितवक्त्रः परिफुल्ललोचनः ॥ ७.५२ ॥

यमजाम्युदवास ऊर्जितो यदि जांबूनदवारि संव्रजेत् ।
कनकद्युतिमध्वसंगवानुपमीयेत स तेन नीलभाः ॥ ७.५३ ॥

यदि राजविभूषणैर्युतौ द्विजवर्यान्वयजाविमौ हरी ।
नृपगोत्रभुवोः पुराऽत्मनोः स्फुटतुल्यावुपगूढयोर्मिथः ॥ ७.५४ ॥

इदमाप शुकोऽपि लाळनं न समग्रं जगतां पितुः पितुः ।
अलभिष्ट यदेष धन्य इत्यतिकौतूहलमापि तापसैः ॥ ७.५५ ॥

अमुष्य शिष्या विनयेन तस्मै गुरोरभिप्रायविदो विदग्धाः ।
तदाऽनुरूपं ददुरासनं ते चतुर्मुखायेव मुकुंददासाः ॥ ७.५६ ॥

आस्यतामित्युदीर्योपविष्टे सत्यवत्याः सुते सत्यवाचि ।
नंदयन् मंदहासावलोकैः तान् मुनींद्रानिहोपाविशत् सः ॥ ७.५७ ॥

अवगम्य तं मुनिगणा वरिष्ठतो
विधिवद्व्यधुर्विधिविदोऽस्य माननाम् ।
अपि संकथाः श्रुतिसुखाः कवींद्रयो
रनयोर्निशम्य परमां मुदं ययुः ॥ ७.५८ ॥

सज्ज्ञानायाऽनंदविज्ञानमूर्ती प्राप्तौ पृथ्वीमाश्रमे तत्र तावत् ।
जाज्वल्येते विष्णुवायू स्म देवौ वेदव्यासानंदतीर्थाभिधानौ ॥ ७.५९ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
नारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते सप्तमः सर्गः ॥